# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा- शास्त्री(SEM-3) (New&Old)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.E.2.3.3** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – दशरूपकम् (प्रथमद्वितीयप्रकाशौ) | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नेषु द्वयोः व्याख्या कार्या।** १०

१ नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे॥

२ औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।
प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः॥

३ लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत्।
बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ दशरूपकरचयितुः परिचयं लिखत।

२ मुखसन्धेः यथाग्रन्थं निरूपणं कुरुत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नेषु द्वयोः व्याख्या कार्या।** १०

१ बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्॥

२ वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥

३ महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।

स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कञ्चिदेकं प्रश्नः विवर्ण्यः।** **१०**

१ सन्ध्यङ्गानां षोढा प्रयोजनानि निरूपयत।

२ नेतुर्लक्षणानि विलिख्य तत्प्रकारान् लिखत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नेषु द्वयोः व्याख्या कार्या।** **१०**

१ स्वाऽन्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा।
मुग्धा मध्या प्रगल्भेति स्वीया शीलार्जवादियुक् ॥

२ कलहान्तरिताऽमर्षाद्विधूतेऽनुशयार्तियुक्।
विप्रलब्धोक्तसमयमप्राप्तेऽतिविमानिता ॥

३ गर्वाभिमानादिष्टेऽपि बिब्बोकोऽनादरक्रिया।
सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत् ॥

**प्रश्न ६ अधः प्रदत्तयोः कञ्चिदेकं प्रश्नं विशदयत।** **१०**

१ नायिकानामष्टावस्थाः निरूप्यन्ताम्।

२ दशरूपकानुसारं कैशिक्यादिवृत्तिनिरूपणं कुरुत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** **१०**

१ दशरूपकस्य रचयिता कः ?

२ दशरूपके कति प्रकाशाः सन्ति ?

३ प्रथमप्रकाशे कति कारिकाः सन्ति ?

४ द्वितीयाप्रकाशे कति कारिकाः सन्ति ?

५ भावकाः कयोः दशरूपानुसारेण माद्यन्ति ?

६ ब्रह्मा कस्मात् सारम् उद्धृत्य नाट्यवेदं चक्रे ?

७ नाट्यस्य किं लक्षणम् ?

८ वस्तु कतिविधम् ?

९ अङ्गवस्तुनः किं नाम ?

१० कार्यस्य कति अवस्थाः भवन्ति ?

११ सन्धयः कति सन्ति ?

१२ अपवादस्य किं लक्षणम् ?

१३ विबोधस्य किं लक्षणम् ?

१४ अर्थोपक्षेपकाः कति भवन्ति ?

१५ सत्त्वजाः स्त्रीणामलङ्काराः कति भवन्ति ?